# shrIkRiShNAShTakam 4

# શ્રીકૃષ્ણાષ્ટકમ્ ૪

## Document Information

Text title : kRiShNAShTakam 4 shriyaashlishhTo vishhNuH

File name : krishna8-4.itx

Category : aShTaka, vishhnu, krishna, shankarAchArya, vishnu

Location : doc_vishhnu

Author : Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, PSA Easwaran

Latest update : December 01, 2001, February 9, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણાષ્ટકમ્ ૪

શ્રિયાઽઽશ્લિષ્ટો વિષ્ણુઃ સ્થિરચરગુરુર્વેદવિષયો
    ધિયાં સાક્ષી શુદ્ધો હરિરસુરહન્તાબ્જનયનઃ ।
ગદી શઙ્ખી ચક્રી વિમલવનમાલી સ્થિરરુચિઃ
    શરણ્યો લોકેશો મમ ભવતુ કૃષ્ણોઽક્ષિવિષયઃ ॥ ૧॥

યતઃ સર્વં જાતં વિયદનિલમુખ્યં જગદિદમ્
    સ્થિતૌ નિઃશેષં યોઽવતિ નિજસુખાંશેન મધુહા ।
લયે સર્વં સ્વસ્મિન્હરતિ કલયા યસ્તુ સ વિભુઃ
    શરણ્યો લોકેશો મમ ભવતુ કૃષ્ણોઽક્ષિવિષયઃ ॥ ૨॥

અસૂનાયમ્યાદૌ યમનિયમમુખ્યૈઃ સુકરણૈ/-
    ર્નિરુદ્ધ્યેદં ચિત્તં હૃદિ વિલયમાનીય સકલમ્ ।
યમીડ્યં પશ્યન્તિ પ્રવરમતયો માયિનમસૌ
    શરણ્યો લોકેશો મમ ભવતુ કૃષ્ણોઽક્ષિવિષયઃ ॥ ૩॥

પૃથિવ્યાં તિષ્ઠન્યો યમયતિ મહીં વેદ ન ધરા
    યમિત્યાદૌ વેદો વદતિ જગતામીશમમલમ્ ।
નિયન્તારં ધ્યેયં મુનિસુરનૃણાં મોક્ષદમસૌ
    શરણ્યો લોકેશો મમ ભવતુ કૃષ્ણોઽક્ષિવિષયઃ ॥ ૪॥

મહેન્દ્રાદિર્દેવો જયતિ દિતિજાન્યસ્ય બલતો
    ન કસ્ય સ્વાતન્ત્ર્યં ક્વચિદપિ કૃતૌ યત્કૃતિમૃતે ।
બલારાતેર્ગર્વં પરિહરતિ યોઽસૌ વિજયિનઃ
    શરણ્યો લોકેશો મમ ભવતુ કૃષ્ણોઽક્ષિવિષયઃ ॥ ૫॥

વિના યસ્ય ધ્યાનં વ્રજતિ પશુતાં સૂકરમુખાં
    વિના યસ્ય જ્ઞાનં જનિમૃતિભયં યાતિ જનતા ।
વિના યસ્ય સ્મૃત્યા કૃમિશતજનિં યાતિ સ વિભુઃ
    શરણ્યો લોકેશો મમ ભવતુ કૃષ્ણોઽક્ષિવિષયઃ ॥ ૬॥

નરાતઙ્કોત્તઙ્કઃ શરણશરણો ભ્રાન્તિહરણો
    ઘનશ્યામો વામો વ્રજશિશુવયસ્યોઽર્જુનસખઃ ।
સ્વયમ્ભૂર્ભૂતાનાં જનક ઉચિતાચારસુખદઃ
    શરણ્યો લોકેશો મમ ભવતુ કૃષ્ણોઽક્ષિવિષયઃ ॥ ૭॥

યદા ધર્મગ્લાનિર્ભવતિ જગતાં ક્ષોભકરણી
    તદા લોકસ્વામી પ્રકટિતવપુઃ સેતુધૃદજઃ ।
સતાં ધાતા સ્વચ્છો નિગમગણગીતો વ્રજપતિઃ
    શરણ્યો લોકેશો મમ ભવતુ કૃષ્ણોઽક્ષિવિષયઃ ॥ ૮॥

ઇતિ હરિરખિલાત્માઽઽરાધિતઃ શઙ્કરેણ
શ્રુતિવિશદગુણોઽસૌ માતૃમોક્ષાર્થમાદ્યઃ ।
યતિવરનિકટે શ્રીયુક્ત આવિર્બભૂવ
સ્વગુણવૃત ઉદારઃ શઙ્ખચક્રાબ્જહસ્તઃ ॥ ૯॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ કૃષ્ણાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded by Sunder Hattangadi

Proofread by Sunder Hattangadi, PSA Easwaran psaeaswaran@gmail.com

*shrIkRiShNAShTakam 4*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*